श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

सप्तर्षिभिः कृतं

# ॥ श्री सप्तर्षिरामायणम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री सप्तर्षिरामायणम् ॥

## बालकाण्डम्

काश्यपः

जातः श्रीरघुनायको दशरथान्मुन्याश्रयात्ताटकां
हत्वा रक्षितकौशिकक्रतुवरः कृत्वाऽप्यहल्यां शुभाम्।
भङ्क्त्वा रुद्रशराऽऽसनं जनकजां पाणौ गृहीत्वा ततो
जित्वाऽर्धाऽध्वनि भार्गवं पुनरगात्सीतासमेतः पुरीम्॥ 1 ॥

## अयोध्याकाण्डम्

अत्रिः

दास्या मन्थरया दयारहितया दुर्भेदिता कैकयी
श्रीरामप्रथमाऽभिषेकसमये माताऽप्ययाचद्वरौ।
भर्तारं भरतः प्रशास्तु धरणीं रामो वनं गच्छता -
दित्याकर्ण्य स चोत्तरं न हि ददौ दुःखेन मूर्च्छां गतः॥ 2 ॥

## आरण्यकाण्डम्

भरद्वाजः

श्रीरामः पितृशासनाद्वनमगात् सौमित्रिसीताऽन्वितो
गङ्गां प्राप्य जटां निबध्य सगुहः सच्चित्रकूटे वसन्।
कृत्वा तत्र पितृक्रियां सभरतो दत्वाऽभयं दण्डके
प्राप्याऽगस्त्यमुनीश्वरं तदुदितं धृत्वा धनुश्चाऽक्षयम्॥ 3 ॥

## किष्किन्धाकाण्डम्

विश्वामित्रः

गत्वा पञ्चवटीमगस्त्यवचनाद्दत्वाऽभयं मौनिनां
    छित्वा शूर्पणखाऽऽस्यकर्णयुगलं त्रातुं समस्तान् मुनीन्।
हत्वा तं च खरं सुवर्णहरिणं भित्वा तथा वालिनं
    ताराररत्नमवैरिराज्यमकरोत्सर्वं च सुग्रीवसात्॥ 4॥

## सुन्दरकाण्डम्

गौतमः

दूतो दाशरथेः सलीलमुदधिं तीर्त्वा हनूमान् महान्
    दृष्ट्वाऽशोकवने स्थितां जनकजां दत्वाङ्गुलेर्मुद्रिकाम्।
अक्षाऽऽदीनसुरान्निहत्य महतीं लङ्कां च दग्ध्वा पुनः
    श्रीरामं च समेत्य देव जननी दृष्टा मयेत्यब्रवीत्॥ 5॥

## युद्धकाण्डम्

जमदग्निः

रामो बद्धपयोनिधिः कपिवरैर्वीरैर्नलाऽऽद्यैर्वृतो
    लङ्कां प्राप्य सकुंभकर्णतनुजं हत्वा रणे रावणम्।
तस्यां न्यस्य विभीषणं पुनरसौ सीतापतिः पुष्पका -
    ऽऽरूढः सन् पुरमागतः सभरतः सिंहासनस्थो बभौ॥ 6॥

## उत्तरकाण्डम्

वसिष्ठः

श्रीरामो हयमेधमुख्यमखकृत् सम्यक् प्रजाः पालयन्
    कृत्वा राज्यमथाऽनुजैश्च सुचिरं भूरिस्वधर्माऽन्वितौ।
पुत्रौ भ्रातृसुताऽन्वितौ कुशलवौ संस्थाप्य भूमण्डले
    सोऽयोध्यापुरवासिभिश्च सरयूस्नातः प्रपेदे दिवम्॥ 7॥

सर्वे ऋषयः
श्रीरामस्य कथासुधातिमधुरान् श्लोकानिमानुत्तमान्
ये शृण्वन्ति पठन्ति च प्रतिदिनं तेऽघौघविध्वंसिनः।
श्रीमन्तो बहुपुत्रपौत्रसहिता भुक्त्वेह भोगांश्चिरं
भोगाऽन्ते तु सदाऽर्चितं सुरगणैर्विष्णोर्लभन्ते पदम्॥ **8**॥

॥ श्री सप्तर्षिरामायणं समाप्तम्॥